ANNUAL EXAMINATION

Question Paper 2024

NCERT BASED SYLLABUS

FOR CBSE AND STATE BOARD
FOLLOWING NCERT

सत्रान्त –परीक्षा प्रश्नपत्रम् (2023-2024)

कक्षा –सप्तमी (7) अवधिः – सार्धहोराद्वयम् (2:30)

विषयः –संस्कृतम् पूर्णांका: – षष्टिः(60)

निर्देशाः –

- सर्वे प्रश्नाः अनिवार्याः सन्ति ।
- सर्वेषां प्रश्नानाम् उत्तराणि प्रश्नक्रमानुसारं लेखनीयानि ।
- अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति । तद्यथा –

क –खण्डः अपठित –अवबोधनम् - 10 अंकाः
ख.- खण्डः रचनात्मक – लेखनम् - 10 अंकाः
ग- खण्डः अनुप्रयुक्त –व्याकरणम् - 15 अंकाः
घ.-खण्डः पठित –अवबोधनम् - 25 अंकाः

क –खण्डः अपठित –अवबोधनम् - 10 अंकाः

प्रश्न क्र.**1**-अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत -

राहुल: जंतुशालाम् गच्छति। सः जनकेन सह गच्छति। तत्र सः सिंहम् पश्यति। सिंहः उच्चैः गर्जति। ततः सः मयूरं पश्यति। मयूरः उपवने शोभनं नृत्यति। सः वृक्षे वानरं दृष्ट्वां भयभीतः अस्ति। वानरः कदलीफलं खादति। एकः अन्यः वानरः अपि तत्र कूर्दति। जंतुशालायाम् अनेके मृगाः सन्ति। राहुलः सर्वान् मृगान् पश्यति प्रसन्नः च भवति। ततः सः गृहम् आगच्छति।

I. एकपदेन उत्तरत- **1x4=4**

(क) राहुलः कुत्र गच्छति? ……..

(ख) सः केन सह गच्छति? ……..

(ग) कः उच्चैः गर्जति? ……..

(घ) वानरः किम् खादति? ……..

II. पूर्णवाक्येन उत्तरत- **2x2=4**

(क) मयूरः किं करोति?

……..

(ख) राहुलः कदा भयभीतः अस्ति?

……..

III.यथानिर्देशम् उत्तरत- **1x2=2**

(क) " जंतुशालायाम् अनेके मृगाः सन्ति " अत्र क्रियापदम् किम् अस्ति ? ……..
1. जंतुशालायाम् 2. मृगाः 3. सन्ति

(ख). सः जनकेन सह गच्छति अत्र "जनकेन" पदे का विभक्ति अस्ति? ……..
1. प्रथमा 2. द्वितीया 3. तृतीया

ख.- खण्डः रचनात्मक – लेखनम् - 10 अंकाः

प्रश्न क्र.**2** चित्रं दृष्ट्वा उपयुक्तपदानि गृहीत्वा वाक्यरचनां कुरुत– **1x5=5**

(बालकाः ,उदेति ,पुष्पाणि, कन्दुकेन, सूर्यः,कमलानि,खगाः ,क्रीडन्ति ,डयन्ते चित्रपतङ्गाः,विकसन्ति, कूजन्ति **)**

schools.aglasem.com
aglasem.com



प्रश्न क्र.**3** कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत- **1x5=5**

(क) ..... बालिका मधुरं गायति। (एकम्, एका, एकः)

(ख) ..... कृषकाः कृषिकर्माणि कुर्वन्ति। (चत्वारः, चतस्रः, चत्वारि)

(ग) .....पत्राणि सुन्दराणि सन्ति। (ते, ताः, तानि)

(घ) धेनवः दुग्धं ..... । (ददाति, ददति, ददन्ति)

(ङ) वयं संस्कृतम् ..... । (अपठम्, अपठन्, अपठाम)

ग- खण्डः अनुप्रयुक्त –व्याकरणम् - **15** अंकाः

प्रश्न क्र.**4** अङ्कानां कृते पदानि लिखतु **1x4=4**

क 28 .....

ख 27 .....

ग 30 .....

घ 31 .....

प्रश्न क्र.**5** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत- **1x4=4**

(क) सलिले <u>नौका</u> सेलति। .....

(ख) <u>पुष्पेषु</u> चित्रपतङ्गाः डयन्ते। .....

(ग) <u>उष्ट्रः</u> पृष्ठे भारं वहति। .....

(घ) <u>धावनसमये</u> अश्वः किमपि न खादति।.....

प्रश्न क्र.**6** अधोलिखित पदेषु धातवः के सन्ति **1x4=4**

पदम् धातुः

schools.aglasem.com

aglasem.com

करोति .....

पश्य .....

भवेत् .....

तिष्ठति .....

प्रश्न क्र.**7** मञ्जूषातः विलोमपदानि चित्वा लिखत **½ x6=3**

(अधुना, मित्रतायाः, लघुचेतसाम्, गृहीत्वा, दुःखिनः, दानवाः)

1. शत्रुतायाः - .....
2. पुरा - .....
3. मानवाः - .....
4. उदारचरितानाम् - .....
5. सुखिनः - .....
6. अपहाय - .....

घ.-खण्डः पठित –अवबोधनम् - **25** अंकाः

प्रश्न क्र.**8** अधोप्रदत्तं श्लोकद्वयं पठित्वा प्रश्नान् उत्तरत-

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ।।**1**।।
मित्रेण कलहं कृत्वा न कदापि सुखी जनः ।
इति ज्ञात्वा प्रयासेन तदेव परिवर्जयेत् ।।**2**।।

एकपदेन उत्तरत –

1. महान् रिपुः कः अस्ति ? ..... (1x2=2)
2. बन्धुः कः अस्ति ? .....

पूर्णवाक्येन उत्तरत – (1x1=1)

3. कः जनः सुखी न भवति ?

.....

schools.aglasem.com
aglasem.com

निर्देशानुसारम् उत्तरत – (1/2x2=1)

4. "महान् रिपुः अस्ति" अत्र विशेषणपदम् किम् अस्ति ? ? .....

(क) महान् (ख) रिपुः (ग) अस्ति

5." नास्त्युद्यमसमो बन्धुः " अत्र क्रियापदम् किम् अस्ति ? .....

(क) ना (ख) अस्ति (ग) उद्यमः

प्रश्न क्र.**9** अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत **-**

विश्वस्य उपलब्धासु भाषासु संस्कृतभाषा प्राचीनतमा भाषास्ति। भाषेयं अनेकाषां भाषाणां जननी मता। प्राचीनयोः ज्ञानविज्ञानयोः निधिः अस्यां सुरक्षितः। संस्कृतस्य महत्त्वविषये केनापि कथितम् - 'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा'।

इयं भाषा अतीव वैज्ञानिकी। केचन कथयन्ति यत् संस्कृतमेव सङ्गणकस्य कृते सर्वोत्तमा भाषा। अस्याः वाङ्मयं वेदैः, पुराणैः, नीतिशास्त्रैः चिकित्साशास्त्रादिभिश्च समृद्धमस्ति। कालिदासादीनां विश्वकवीनां काव्यसौन्दर्यम् अनुपमम्। कौटिल्यरचितम् अर्थशास्त्रं जगति प्रसिद्धमस्ति। गणितशास्त्रे शून्यस्य प्रतिपादनं सर्वप्रथमम् आर्यभटः अकरोत्।

एकपदेन उत्तरत –

1. प्राचीनतमा भाषा का अस्ति। ? ..... (1x2=2)

2. किम् जगति प्रसिद्धमस्ति ? .....

पूर्णवाक्येन उत्तरत – (1x1=1)

3. संस्कृत भाषायाः वाङ्मयं कैः समृद्धमस्ति ?

.....

निर्देशानुसारम् उत्तरत – (1/2x2=1)

4. कस्मिन् पदे षष्ठी विभक्ति नास्ति ? .....

(क) भाषाणां (ख) भारतस्य (ग) वेदैः

5. शून्यस्य प्रतिपादनं सर्वप्रथमम् आर्यभटः अकरोत् अत्र कर्तृपदम् किम् अस्ति? .....

(क) शून्यस्य (ख) आर्यभटः (ग) अकरोत्

प्रश्न क्र.**10** अधः प्रदत्तं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

शुचिः - अस्माकं देशस्य ध्वजः त्रिवर्णः इति।

सलीमः - रुचे! अयं त्रिवर्णः कथम्?

रुचिः - अस्मिन् ध्वजे त्रयः वर्णाः सन्ति, अतः त्रिवर्णः। किं त्वम् एतेषां वर्णानां नामानि जानासि?

सलीमः - अरे! केशरवर्णः, श्वेतः, हरितः च एते त्रयः वर्णाः।

देवेशः - अस्माकं ध्वजे एते त्रयः वर्णाः किं सूचयन्ति?

सलीमः - शृणु, केशरवर्णः शौर्यस्य, श्वेतः सत्यस्य, हरितश्च समृद्धेः सूचकाः सन्ति।

एकपदेन उत्तरत –

1. अस्माकं देशस्य ध्वजः कीदृशः अस्ति ? ..... (1x2=2)

2. हरितः वर्णः कस्य सूचकः अस्ति ?

पूर्णवाक्येन उत्तरत – (1x1=1)

3. त्रिवर्णध्वजे त्रयः के के वर्णाः सन्ति ?

schools.aglasem.com

aglasem.com

……

निर्देशानुसारम् उत्तरत – (1/2x2=1)

4. "त्वम् एतेषां वर्णानां नामानि जानासि" अत्र क्रियापदम् किम् अस्ति? ……

(क) त्वम् (ख) जानासि (ग) नामानि

5. केशरवर्णः .....सूचक: अस्ति ? ……

(क) सत्यस्य (ख) समृद्धेः (ग) शौर्यस्य

प्रश्न क्र.**11** विशेषणपदैः सह विशेष्यपदानि योजयत- **½ x6=3**

(बालिकानाम् , विद्यालयम् , बालकानाम् , अधिकारः, अल्पवयस्का , विद्यालये **)**

1. सर्वेषाम् - .....

2. मौलिकः .....

3. एषा .....

4. सर्वकारीयम् .....

5. समीपस्ये .....

6. सर्वासाम् .....

प्रश्न क्र.**12** मञ्जूषातः समानार्थकपदानि चित्वा लिखत **½ x6=3**

(परस्य ,आत्मानम् ,बाधितः ,परिवारः, सम्पन्नम्, त्यक्त्वा)

1. स्वकीयम् ---------

2. अवरुद्धः ---------

3. कुटुम्बकम् --------

4. अन्यस्य -------

5. अपहाय -------

6. समृद्धम् -------

प्रश्न क्र.**13** मञ्जूषातः क्रियापदानि चित्वा रिक्तस्थानानि पूरयत **½ x6=3**

(करिष्यामि , गमिष्यति ,अनयत्, पतिष्यति ,स्फोटयिष्यति ,त्रोटयति)

(क) काष्ठकूटः चञ्च्वा गजस्य नयने ... . ।

(ख) मार्गे स्थितः अहमपि शब्दं .... ।

(ग) तृषार्तः गजः जलाशयं ..... |

(घ) गजः गर्ते ..... ।

(ङ) काष्ठकूटः तां मक्षिकायाः समीपं . ..... |

schools.aglasem.com

aglasem.com

(च) गजः शुण्डेन वृक्षशाखा: ..... |

प्रश्न क्र.**14** श्लोकांशान् योजयत **1x4=4**

धनधान्यंप्रयोगेषु	नासद्भिःकिन्चिदचरेत
विस्मयो न हि कर्तव्यः	त्यक्तलज्जःसुखी भवेत्
सत्येन धार्यते पृथिवी	बहु रत्ना वसुन्धरा
सद्भिर्विवादं मैत्रीं च	विद्यायाः संग्रहेषु च
आहरे व्यवहारे च	सत्येन तपते रविः

schools.aglasem.com

aglasem.com

सत्रान्त परीक्षा 2023-24

कक्षा -सप्तमी (7)

विषय- संस्कृत पूर्णांका:- 60 अवधि– 2.30 होराद्वयम्

उत्तर पञ्जिका

खंड(क)

उत्तर 1- **अपठित अवबोधन**(10)

I. **एक पदेन उत्तरत**-(1×4=4)

(**क**) जन्तुशालां (**ख**) जनकेन (ग)सिन्हः (घ) कद्लिफ़लम्

II. **पूर्ण वाक्येन उत्तरत**-(2×2=4)

(**क**) मयूरः उपवने शोभनं नृत्यति

(**ख**) राहुलः वृक्षे वानरं दृष्ट्वा भयभीतः अस्ति

III. भाषिक कार्य

1. सन्ति
2. तृतीया

खंड (ख)

उत्तर 2-

1. **कोई भी पांच वाक्य लिखें** (1×5=5)

उत्तर 3-

1. एका
2. चत्वारः
3. तानि
4. ददन्ति
5. अपठाम्

खंड(ग)

schools.aglasem.com

aglasem.com

उत्तर 4-

1. अष्टाविन्शति
2. सप्तविन्शति
3. त्रिन्शत्
4. एकत्रिन्शत्

उत्तर 5-

1. का
2. केषु
3. कः
4. कदा

उत्तर 6-

1. कृ धातु
2. दृश धातु
3. भू धातु
4. स्था धातु

उत्तर 7-

1. मित्रतायाः
2. अधुना
3. दानवाः
4. लघु चेतसां
5. दुखिनः
6. गृहित्वा

खंड(घ)

उत्तर 8-

1. **एकपदेन उत्तरत**

1. आलस्यं
2. उद्दमः

0. **पूर्णवाक्येन उत्तरत**

0. यः मित्रेन सः कलहं न करोति

schools.aglasem.com

aglasem.com

0. **निर्देशानुसारं उत्तरत**

0. क) महान

0. अस्ति

उत्तर 9-

एकपदेन उत्तरत

1. संस्कृत भाषा

2. अर्थशास्त्रं

पूर्णवाक्येन उत्तरत

0. संस्कृत भाषायाः वान्ग्मयं वेदैः पुराणेः नीतिशास्त्रैः संमृध्हं अस्ति

निर्देषानुशारं उत्तरत

0. भाषाणां

0. आर्यभटः

उत्तर 10-

एकपदेन उत्तरत

1. त्रिवर्णः

2. समृद्धे:

पूर्ण वाक्येन उत्तरत

0. केशरवर्णः श्वेतवर्णः हरित्वर्णः

निर्देषानुशारं उत्तरत

0. जानासि

0. शौर्यस्य

उत्तर 11-

1. बालकानां

2. अधिकाराः

3. अल्पवयस्का

4. विद्यालयं

5. विद्यालये

6. बालिकानाम्

उत्तर 12-

1. आत्मानं

schools.aglasem.com

aglasem.com

2. बाधितः

3. परिवारस्य

4. परस्य

5. त्यक्त्वा

6. संपन्नं

उत्तर 13-

1. स्फोटयिष्यति

2. करिष्यामि

3. गमिष्यति

4. पतिष्यति

5. अनयत्

6. त्रोटयति

उत्तर 14-

1. विद्यायाः संग्रहेषु च

2. बहुरत्ना वसुन्धरा

3. सत्येन तपते रविः

4. नासद्भि: किञ्चिदाचरेत

5. त्यक्तलज्जः सुखी भवेत्

××××××××××××××××××××

schools.aglasem.com

AglaSem Earn while Learn Program. Send your papers and get paid.
Contact: support@aglasem.com aglasem.com

QUESTION PAPERS

GET PREVIOUS YEAR QUESTION PAPERS FOR ALL CLASSES FOR CBSE, ISCSE, ISC AND ALL ALL STATE BOARDS HERE AT AGLASEM.COM

BOARD WISE

- Andhra Pradesh Board Question Papers
- Assam Board Question Papers
- Bihar Board Question Papers
- Chhattisgarh Board Question Papers
- Goa Board Question Papers
- Gujarat Board Question Papers
- Haryana Board Question Papers
- Himachal Pradesh Board Question Papers
- J&K State Board Question Papers
- Jharkhand Board Question Papers
- Karnataka Board Question Papers
- Kerala Board Question Papers
- Madhya Pradesh Board Question Papers
- Maharashtra State Board Question Papers
- Manipur Board Question Papers
- Meghalaya Board Question Papers
- Mizoram Board Question Papers
- Nagaland Board Question Papers
- Orissa Board Question Papers
- Punjab Board Question Papers
- Rajasthan Board Question Papers
- Tamil Nadu Board Question Papers
- Telangana State Board Question Papers
- Tripura Board Question Papers
- Uttarakhand Board Question Papers
- Uttar Pradesh (UP) Board Question Papers
- West Bengal (WB) Board Question Papers